# Kashmirashaivadarshane ShadtrinshattattvanAm Raikhikamadhyayana-Prarupyam

# કાશ્મીરશૈવદર્શને ષડ્ત્રિંશત્તત્ત્વાનાં રૈખિકમધ્યયન-પ્રારુપ્યમ્

## Document Information

Text title : Kashmirashaivadarshana Prarupyam

File name : kAshmIrashaivadarshaneprArupyam.itx

Category : misc, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda pknanda65 at gmail.com

Proofread by : Pradipta Kumar Nanda

Description/comments : kAshmIrashaivadarshane ShaDtri.nshattattvAnAM raikhikamadhyayanaprArUpyam

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : August 19, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 19, 2026

*sanskritdocuments.org*

Kashmirashaivadarshane ShadtrinshattattvanAm
Raikhikamadhyayana-Prarupyam

# કાશ્મીરશૈવદર્શને ષડ્ત્રિંશત્તત્ત્વાનાં રૈખિકમધ્યયન-પ્રારૂપ્યમ્

## ૧. ભૂમિકા એવં પીઠિકા (Introduction and Background)

ભારતીયદાર્શનિકપરમ્પરાસુ કશ્મીરશૈવદર્શનમ્ (પ્રત્યભિજ્ઞા-ત્રિક-સિદ્ધાન્તઃ) અદ્વૈતવેદાન્તસ્ય અતિરિચ્ય ચેતનાયાઃ જગદ્વિસ્તારસ્ય ચ અત્યન્તં ગમ્ભીરાં વૈજ્ઞાનિકીં ચ વ્યાખ્યાં કરોતિ । અસ્મિન્ દર્શને પરબ્રહ્મ "પરમશિવઃ" સ્વકીયયા અનન્તયા સ્વાતન્ત્ર્યશક્ત્યા આત્માનમ્ એવ વિશ્વરૂપેણ પ્રકટયતિ । અસ્ય વિશ્વપ્રપઞ્ચસ્ય અભિવ્યક્તેઃ લયસ્ય ચ મૂલાધારઃ ષડ્ત્રિંશત્ (૩૬) તત્ત્વાનિ સન્તિ ।

સામાન્યતઃ એતાનિ ૩૬ તત્ત્વાનિ ત્રિષુ વર્ગેષુ (શુદ્ધ-શુદ્ધાશુદ્ધ-અશુદ્ધતત્ત્વેષુ) વિભજ્ય અધ્યીયન્તે । કિન્તુ પરમશિવાત્ (પરમચેતનાત્) આરભ્ય પૃથિવી (સ્થૂલજડપદાર્થઃ) પર્યન્તમ્ યઃ સૃષ્ટિક્રમઃ અસ્તિ, તથા પૃથિવ્યાઃ પુનઃ પરમશિવપર્યન્તં યઃ લયક્રમઃ (યોગમાર્ગઃ) અસ્તિ, સઃ કશ્ચન "અવિચ્છિન્નઃ, ક્રમિકઃ, રૈખિકશ્ચ (Continuous Linear Sequence)" માર્ગઃ અસ્તિ । અસ્મિન્ શોધકાર્યે એતેષાં ૩૬ તત્ત્વાનામ્ એતાદૃશસ્ય રૈખિક-પરિણામસ્ય (Linear Hierarchy and Evolution) દાર્શનિકમ્ વિશ્લેષણાત્મકઞ્ચ અધ્યયનં કરિષ્યતે ।

## ૨. શોધસ્ય સમસ્યા (Research Problem)

પારમ્પરિકગ્રન્થેષુ ૩૬ તત્ત્વાનાં વર્ગીકરણં ખણ્ડશઃ (Categorical Division) લભ્યતે, યેન ચેતનાયાઃ (Consciousness) તથા પદાર્થસ્ય (Matter) મધ્યે કશ્ચન કૃત્રિમઃ ભેદઃ દૃશ્યતે । પરમચેતનાત્ જડપદાર્થસ્ય નિર્માણે રૈખિક-સોપાનાનાં (Linear Transition States) નિરન્તરતા કથં સિદ્ધ્યતિ? શુદ્ધતત્ત્વેભ્યઃ અશુદ્ધતત્ત્વેષુ પ્રવેશકાલે "માયા" તથા "પઞ્ચકઞ્ચુકાનિ" કથં રૈખિક-સંધિબિન્દુરૂપેણ કાર્યં કુર્વન્તિ? એષા સમસ્યા દાર્શનિકદૃષ્ટ્યા સમાધાતું ૩૬ તત્ત્વાનામ્ અવરોહણ-આરોહણયોઃ રૈખિક-અધ્યયનમ્ અતીવ આવશ્યકમ્ અસ્તિ ।

## ૩. શોધસ્ય ઔચિત્યમ્ મહત્ત્વઞ્ચ (Rationale and Significance)

કઃ-ચેતના-પદાર્થયોઃ સેતુરૂપતાઃ અયં શોધઃ પરમશિવસ્ય અભિન્ન-પ્રકાશ-વિમર્શયોઃ પૃથિવીપર્યન્તં ઘનીભૂતતાયાઃ (Condensation of Consciousness) રૈખિક-માર્ગમ્ ઉદ્ઘાટયિષ્યતિ ।

ખઃ- સાધનાપદ્ધતેઃ સુગમતા - યોગિનઃ સાધનાકાલે પૃથિવ્યાઃ શિવપર્યન્તં યં “પ્રત્યાહારમ્” વા “લયક્રમમ્” કુર્વન્તિ, તસ્ય રૈખિક-માનચિત્રમ્ (Linear Blueprint) અનેન શોધેન સ્પષ્ટં ભવિષ્યતિ ।

ગઃ-આધુનિકવિજ્ઞાનેન સહ તુલના - આધુનિક-ભૌતિકવિજ્ઞાને (Modern Physics) તથા ચેતનાવિજ્ઞાને (Consciousness Studies) “Energy to Matter” તથા “Matter to Consciousness” ઇતિ યઃ વિચારઃ અસ્તિ, તસ્ય સમીક્ષણે અયમ્ અધ્યયનઃ નૂતનાં દિશં દાસ્યતિ ।

## ૪. શોધસ્ય ઉદ્દેશ્યાનિ (Research Objectives)

ઉદ્દેશ્યમ્

ક - કશ્મીરશૈવદર્શનાનુસારં પરમશિવાત્ પૃથિવીપર્યન્તમ્ ૩૬ તત્ત્વાનાં સોપાનક્રમસ્ય (Descending Order) રૈખિક-વિશ્લેષણમ્ ।

ખ - શુદ્ધ-શુદ્ધાશુદ્ધ-અશુદ્ધ-ઇતિ વર્ગત્રયસ્ય મધ્યે રૈખિક-સમ્બન્ધસ્ય તથા માયા-પઞ્ચકઞ્ચુકાનાં સઙ્ક્રમણકાલીન-ભૂમિકાયાઃ નિરૂપણમ્ ।

ગ - સાધનાદૃષ્ટ્યા પૃથિવ્યાઃ પરમશિવપર્યન્તમ્ આરોહણ-રૈખિકક્રમસ્ય (Laya-Krama/ Ascending Path) અનુશીલનમ્ ।

ઘ - અસ્ય ૩૬-તત્ત્વીય-રૈખિક-સંરચનાયાઃ આધુનિક-ચેતનાવિજ્ઞાનેન સહ તુલનાત્મકં સમીક્ષણમ્ ।

## ૫. શોધ-પ્રશ્નાઃ (Research Questions)

કઃ કશ્મીરશૈવદર્શને ષડ્ત્રિંશત્તત્ત્વાનાં રૈખિકઃ (Linear) ક્રમઃ કઃ, તથા અયં ક્રમઃ ખણ્ડશઃ વર્ગીકરણાત્ કથં શ્રેષ્ઠઃ?

ખઃ પરમશિવસ્ય સ્વાતન્ત્ર્યશક્ત્યા શુદ્ધતત્ત્વેષુ “અહમ્” તથા “ઇદમ્” અનયોઃ સમ્બન્ધસ્ય રૈખિક-વિકાસઃ કથં ભવતિ?

ગઃ અસીમિતસ્ય શિવસ્ય પરિમિતજીવત્વેન સંકોચે “માયા” તથા “પઞ્ચકઞ્ચુકાનામ્” (૬-૧૧ તત્ત્વાનામ્) રૈખિકં સ્થાનં કિમ્?

ઘઃ અશુદ્ધતત્ત્વેષુ (૧૨-૩૬) પ્રકૃતેઃ પઞ્ચમહાભૂતપર્યન્તં સૂક્ષ્મતાયાઃ સ્થૂલતાં પ્રતિ રૈખિક-સોપાનાનિ કાનિ સન્તિ?

ઙઃ સાધનાકાલે એતેષાં તત્ત્વાનાં વિલોમ-રૈખિક-ક્રમઃ (Ascending Involution) જીવં કથં શિવત્વં નયતિ?

## ૬. શોધપરિકલ્પના (Research Hypothesis)

કશ્મીરશૈવદર્શને ષડ્ત્રિંશત્તત્ત્વાનિ ન તુ પૃથક્-પૃથક્ જડ-ચેતન-ખણ્ડાઃ, અપિતુ પરમશિવસ્ય સ્વાતન્ત્ર્યશક્ત્યાઃ સંકોચ-વિકાસયોઃ એકા નિરન્તરા, સોપાનબદ્ધા, રૈખિકી ચ શ◌ૃઙ્ખલા અસ્તિ, યસ્યાઃ અવબોધનેન એવ અદ્વૈત-ચિતિસત્તાયાઃ જગદ્રૂપેણ પરિણામઃ સિદ્ધ્યતિ । ”

## ૭. શોધપદ્ધતિઃ (Research Methodology)

અસ્મિન્ શોધકાર્યે પાઠાધારિતા (Textual Analysis), વૈચારિક-વિશ્લેષણાત્મકી (Analytical and Theoretical) તથા તુલનાત્મકી (Comparative Methodology) શોધપદ્ધતિઃ પ્રયુક્તા ભવિષ્યતિ ।

પ્રાથમિકસ્રોતાંસિ- તન્ત્રાલોકઃ, ઈશ્વરપ્રત્યભિજ્ઞાકારિકા, પ્રત્યભિજ્ઞાહૃદયમ્, શિવસૂત્રવિમર્શિની, તન્ત્રસારઃ, તત્ત્વસન્દોહઃ ચ ।

દ્વિતીયકસ્રોતાંસિ- કશ્મીરશૈવદર્શનસ્ય આધુનિક-વિદુષાં (યથા- જયદેવસિંહઃ, જે। સી। ચટર્જી, કાન્તિચન્દ્રપાણ્ડેયઃ, માર્કડિચકોવ્સ્કી ઇત્યાદિ) શોધગ્રન્થાઃ શોધપત્રિકાશ્ચ ।

## ૮. સમ્ભાવ્યમ્ અધ્યાયીકરણમ્ (Proposed Chapter Scheme)

પ્રથમોઽધ્યાયઃ

૧.૧-પ્રસ્તાવના

૧.૨-કશ્મીરાદ્વૈતદર્શનસ્ય પીઠિકા

૧.૩-કશ્મીરશૈવદર્શનસ્ય ઐતિહાસિક-તથ્યાનિ

૧.૪-દાર્શનિકાનાં પરિચયઃ ।

૧.૫- “તત્ત્વ” અવધારણા તથા “રૈખિક-અધ્યયનસ્ય” (Linear Methodology) આવશ્યકતા ।

દ્વિતીયોઽધ્યાયઃ

૨.૧- પરમપ્રકાશસ્ય પ્રથમઃ રૈખિક-પ્રસારઃ (શુદ્ધતત્ત્વાનિ - ૧ તઃ ૫)

૨.૨- પરમશિવઃ

૨.૩- શક્તિઃ

૨.૪- સદાશિવઃ

૨.૫- ઈશ્વરઃ

૨.૬- સદ્વિદ્યા ચ

૨.૭-“અહમ્” (Self) તથા “ઇદમ્” (Object) અનયોઃ શુદ્ધ-સામરસ્યસ્ય રૈખિક-વિકાસઃ ।

તૃતીયોઽધ્યાયઃ

૩.૧- પરિચ્છેદ-સઙ્ક્રમણમ્ (શુદ્ધાશુદ્ધતત્ત્વાનિ - ૬ તઃ ૧૧)

૩.૨- માયાતત્ત્વસ્ય અવધારણા ।

૩.૩- પઞ્ચકઞ્ચુકાનામ્ (કાલ, કલા, નિયતિ, રાગ, વિદ્યા) રૈખિક-સંકોચ-પ્રક્રિયા ।

ચતુર્થોઽધ્યાયઃ

૪.૧- સ્થૂલજગતઃ રૈખિક-વિસ્તારઃ (અશુદ્ધતત્ત્વાનિ - ૧૨ તઃ ૩૬)

૪.૨- પુરુષ-પ્રકૃત્યોઃ સ્વરૂપમ્ ।

૪.૩- અન્તઃકરણમ્ (૩), જ્ઞાનેન્દ્રિયાણિ (૫), કર્મેન્દ્રિયાણિ (૫), તન્માત્રાઃ (૫), પઞ્ચમહાભૂતાનિ (૫) ચ ।

પઞ્ચમોઽધ્યાયઃ

૫.૧- વિલોમ-રૈખિક-ક્રમઃ (The Ascending Path / Laya-Krama)

૫.૨- યોગસાધનાયાં પ્રત્યભિજ્ઞાક્રમે ચ ૩૬ તત્ત્વાનાં લયક્રમઃ ।

૫.૩- અવરોહણમ્ (Evolution)

૫.૪- આરોહણમ્ (Involution)

૫.૫- અનયોઃ માર્ગયોઃ સાદૃશ્યમ્ ।

ષષ્ઠોઽધ્યાયઃ

૬.૧- શોધસ્ય મુખ્યાઃ પ્રાપ્તીનાં સંક્ષેપઃ ।

૬.૨- આધુનિક-ચેતનાવિજ્ઞાને (Consciousness Studies) અસ્ય રૈખિકાધ્યયનસ્ય ઉપયોગિતા ।

૭- ઉપસંહારઃ નિષ્કર્ષાશ્ચ (Conclusion and Findings)

૮- સહાયકગ્રન્થસૂચી (Select Bibliography)

(ક) પ્રાથમિક-સંસ્કૃતગ્રન્થાઃ

૧. અભિનવગુપ્તઃ - તન્ત્રાલોકઃ (જયરથકૃત-" વિવેક" -ટીકાસહિતઃ), મોતીલાલ બનારસીદાસ, દેહલી ।

૨. ઉત્પલદેવઃ - ઈશ્વરપ્રત્યભિજ્ઞાકારિકા (વિમર્શિની ટીકાસહિતા)।

૩. ક્ષેમરાજઃ - પ્રત્યભિજ્ઞાહૃદયમ્ (સ્વોપજ્ઞવૃત્તિસહિતમ્)।

૪. ક્ષેમરાજઃ - તત્ત્વસન્દોહઃ ।

૫. વાસુગુપ્તઃ - શિવસૂત્રાણિ (ક્ષેમરાજકૃત-" વિમર્શિની" -સહિતાનિ)।

(ખ) દ્વિતીયક-અનુસન્ધાનગ્રન્થાઃ -

૧. Chatterji, J. C. - Kashmir Shaivism (The Secret doctrine of the 36 Tattvas), SUNY Press.

૨. Singh, Jaideva - Pratyabhijñāhṛdayam - The Secret of Self-Recognition, Motilal Banarsidass, Delhi.

૩. Dyczkowski, Mark S. G. - The Doctrine of Vibration, SUNY Press, New York.

૪. Pandey, K. C. - Abhinavagupta - An Historical and Philosophical Study, Chowkhamba, Varanasi.

૫. રસ્તોગી, કાન્તિચન્દ્રઃ - કશ્મીર શૈવ દર્શન, ઉત્તર પ્રદેશ હિન્દી સંસ્થાન, લખનઊ ।

૬. Wikipedias

Prof. Dr. Pradipta Kumar Nanda

Retd. Head, Dept.of Sarvadarshan

SJSV,Puri

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

---

*Kashmirashaivadarshane ShadtrinshattattvanAm Raikhikamadhyayana-Prarupyam*

pdf was typeset on August 19, 2026

Please send corrections to *sanskrit@cheerful.com*